श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीशैलपूर्णकुलतिलकचतुर्वेदशतक्रतु
श्रीकुमारतातयार्यनन्दनस्य सर्वतन्त्र स्वतन्त्र
वेदान्ताचार्य सिद्धान्त विजयध्वजस्य
श्रीपट्टराचार्यापरनाधेयस्य
श्रीवेङ्कटाचार्यस्य कृतिषु

# ॥ विंशतिरत्नमाला ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ विंशतिरत्नमाला ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सुदर्शनकृपालब्धवेदतत्त्वार्थसागरम्।
अनुष्ठितक्रतुशतं वन्देऽस्मत्पितरं गुरुम्॥

कुमारतातयाचार्यं सदाचारपरं सदा।
वेदान्ताचार्यसिद्धान्तविजयध्वजमाश्रये॥

वेङ्कटाचार्यरचिता वेदान्तचार्यसंस्तुतिः।
उपलाल्या बुधैरेषा शिशोरस्फुटवागिव॥

यद्वाणीकणपाठनिर्मलमना गर्वोद्धतानां पुरो
जेता संसदि वावदूकसदसां किञ्च त्रयीपारगः।
यत्पादाम्बुजसंस्मृतेरपि नृणां स्वर्गापवर्गोदय-
स्सोऽयं वेदशिरोगुरुर्विजयतामाचन्द्रमातारकम्॥ १॥

आम्नायाञ्चलदेशिकाङ्घ्रियुगलीसेवारतेर्माधुरी
वैदग्धीपदबन्धतः स्मयहराः प्राचामवाचामपि।
जृम्भन्ते वचसां प्रवाहनिकरारिङ्गन् मिथस्सङ्गमा
नृत्यच्छम्भुजटाकलापविलुडद्गङ्गातरङ्गा इव॥ २॥

डम्भध्वंसपटुर्विशृङ्खलमतिः कन्दर्पदर्पापहो
लोभक्रोधमदाभिमानकुहनाव्यापारनिर्वापकः।
मोहध्वान्तदिवाकरो विजयते धूताभ्यसूयानल-
स्त्राता नः कवितार्किकेन्द्र मृगराण्मूर्तो विवेको यथा॥ ३॥

www.prapatti.com

तृष्णाऽभावतृणीकृतप्रभुकुलस्सिद्धान्तशुद्धोक्तिभिः
क्षुभ्यत्क्षुद्रकुदृष्टिसौगतमुखः प्राप्तागमव्याप्तधीः।
वादे जाग्रति वेदमौळिगुरुराडग्रे समग्रे कला
भेदे सर्वपथीनबुद्धिविभवो भूयादपायापहः॥ ४॥

वैराग्यं प्रतितन्त्रसारकृतिषु स्पष्टं तवालक्ष्यते
वैदुष्यं तव वेदशेखरगुरो! सर्वार्थसिद्ध्यादिषु।
वैदग्ध्यं सकलातिशायि भवतस्सङ्कल्पसूर्योदये
शक्त्यस्ते न वसस्सुधां गुरुरपि स्तोतुं कुतो मादृशः॥ ५॥

आम्नायान्तगुरुं सनातनगुरोर्मान्यामिवान्यां तनुं
चेतस्संश्रय गोचरेषु विपुलाकारेण चारेण किम्।
मन्वीथा न परं कदापि सहजाहङ्कारहुङ्कारिणं
क्षीरं किं परमर्थयेत निवसन् मुग्धोऽपि दुग्धोदधौ॥ ६॥

यदि भगवतः पद्मानेतुर्दया मयि भूयसी
भवजलनिधेरुत्तारश्चेत्तदङ्घ्रिनिषेवणात्।
विहितविषयासक्ता बुद्धिर्ममान्यविरागिणी
निगमशिखराचार्यादन्यं कदापि न सेवताम्॥ ७॥

निजगुरुपदप्रेमा रामानुजार्यवचस्सुधा-
परिचय भवस्थेमा कामादिदोषदुरासदः।
निरवधियशोभूमा सीमागुरुर्गुणसंपदं
जगदघहरन्नामा मामादरादवलोकताम्॥ ८॥

त्रयीमकुटदेशिकप्रवरमात्मनि ध्यायतां
न संसृतिदवज्वरः कुत उदेति भीतिः परा।
विवस्वति नभस्वति प्रसभमुद्गमोद्योगिनि
क्व सर्पति तमः कथा क्वनु च तूलराशेः स्थितिः॥ ९॥

दिगन्तविसरस्त्रयीपरिमळैर्निगुम्भैर्गिरां
विकस्वरमुखाम्बुजस्रुतमरन्दपूरैरिव।



www.prapatti.com

दुरन्तविषयाटवीविषमचारखेदालसान्
    निषिञ्चतु मधुव्रतान् निगमचूळिकादेशिकः॥ १० ॥

न चेद्देवः श्रीमानवतरति बाह्यान्धतमसैः
    निरालोके लोके निगममकुटाचार्यवपुषा।
परिष्कारं त्रय्याः क इव कुरुते संसृतिमहा-
    पयोधौ मग्नानां क इव भविता नौरिव नृणाम्॥ ११ ॥

रुचिः प्राप्तुं लक्ष्म्या नयनभवनर्माणि सदया
    तरङ्गापाङ्गानि स्फुटकमलशोभानि यदि ते।
निमङ्क्तुं नित्ये चेदभिलषितमामोदजलधौ
    प्रपद्येथाश्चेतस्सकृदकृतवागञ्चलगुरुम्॥ १२ ॥

निष्ठाक निष्ठित वसिष्ठमुखो गरिष्ठ-
    श्रैष्ठ्योदयः स्वयमनुष्ठितवेदमार्गः।
निर्जित्य सौगत कणाद कुदृष्टिमुख्यान्
    निष्कण्टको जयति वेङ्कटदेशिकेन्द्रः॥ १३ ॥

बाह्यैरकृत्रिमगिरां जरतीकृतानां
    सञ्चारहेतुरवलम्बनयष्टिरिन्धे।
तारुण्यदा च कवितार्किकसिंहसूक्तिः
    रामानुजार्यमुनिजैत्रपताकिकेव॥ १४ ॥

आशु विस्तरविचित्रमाधुरीरीतयः फणितयो वितन्वते।
संसृतौ तमसि मज्जतां नृणामागमाञ्चलगुरोरुषः श्रियम्॥ १५ ॥

उक्तिभिस्सुमनसामिवालिभिर्यस्त्रयी कचभरानभूषयत्।
सुश्रुतेरुपरिभागदेशिकस्संविदन् दिशतु मेऽनपायिनीम्॥ १६ ॥

किं तेषामुपवासैः तपसा तप्तेन पुण्यतीर्थैर्वा।
प्रणमन्ति चेतसा ये सकृदपि वेदान्त देशिकेन्द्र पदम्॥ १७ ॥

परिपाक स्सुकृतानां अनन्तसूरेरपारकारुण्या।
घण्टावतारमूर्तिः घटयतु सन्मार्गसाभिलाषं माम्॥ १८ ॥



www.prapatti.com

गुरुवर हर दोषं मद्विवेक प्रमोषं
    कुरु नयनविलासान् कल्पितांहोनिरासान्।
य इह शुभतरं ते सत्प्रबन्धं व्रजन्ते
    निगमपटुरमीषां अभ्युदेता मनीषा॥ १९ ॥

जयति शुभतमानां जन्मभूमिर्गुणानां
    पर इव परिणामः पुष्कलानां कलानाम्।
सुरतरुरिव भौमः संश्रितानां जनानां
    विमलतरविवेको विष्णुघण्टावतारः॥ २० ॥

तीर्थोत्सवे महति शेषधराधरेन्दो
    तद्दैवतेऽप्युडुनि भाद्रपदे च मासे।
घण्टात्मनावतरतो निगमान्तसूरेः
    हृद्यां श्रियं वहतु विंशतिरत्नमाला॥ २१ ॥

॥ इति आचार्यविंशतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥